http://www.a2zSubjects.com

# MP BOARD CLASS 10 PAPER 2013

## संस्कृत (सामान्य) : कक्षा X

समय : घण्टात्रयम् ] [ पूर्णांक : १००

निर्देशाः—(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।
(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

प्रश्न १. उचितविकल्पं चित्वा लिखत— ४

(क) 'एकैकः' इत्यस्मिन् पदे सन्धिः अस्ति—
(अ) गुण सन्धिः (ब) अयादि सन्धिः
(स) यण् सन्धिः (द) वृद्धिः सन्धिः।

(ख) 'उत् + चारणम्' इत्यस्य सन्धिः अस्ति—
(अ) उत्चारणम् (ब) उद्चारणम्
(स) उच्चारणम् (द) उच्छारणम्।

(ग) 'तवल्कारः' इत्यस्य सन्धि-विग्रहः अस्ति—
(अ) तव् + अल्कारः (ब) तव + ल्कारः
(स) तवल् + कारः (द) तव + ऌकारः।

(घ) व्यञ्जन सन्धिः अस्ति—
(अ) नमस्ते (ब) तट्टीका
(स) पवनः (द) मनोरथः।

उत्तर—(क) (द), (ख) (स), (ग) (द), (घ) (ब)।

प्रश्न २. (क) द्विगुसमासस्य उदाहरणम् नास्ति— १
(अ) त्रिभुवनम् (ब) दशाननः
(स) पञ्चवटी (द) अष्टाध्यायी।

(ख) 'महात्मा' इत्यस्मिन् पदे समासः अस्ति— १
(अ) तत्पुरुषसमासः (ब) द्वन्द्वसमासः
(स) कर्मधारयसमासः (द) अव्ययीभावसमासः।

(ग) 'परोपकारः' इति पदस्य समास विग्रहः भवति— १
(अ) परोपस्य कारः (ब) परेषाम् उपकारः
(स) परेण उपकारः (द) परम् उपकारः।

उत्तर—(क) (ब), (ख) (स), (ग) (ब)।

प्रश्न ३. (क) 'द्रक्ष्यति' इति पदे धातुः अस्ति— १
(अ) द्रक्ष् (ब) दृश्
(स) दा (द) रक्ष्।

(ख) 'पठेयुः' इत्यस्मिन् पदे लकारः अस्ति— १
(अ) लट्लकारः (ब) लोट्लकारः
(स) लङ्लकारः (द) विधिलिङ्लकारः।

(ग) 'ददति' इत्यस्मिन् पदे वचनम् अस्ति— १
(अ) एकवचनम् (ब) द्विवचनम्
(स) बहुवचनम् (द) मृदुवचनम्।

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

(घ) 'वर्धताम्' इत्यस्मिन् पदे पुरुषः अस्ति— १

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) उत्तमपुरुषः (द) महापुरुषः।

उत्तर—(क) (ब), (ख) (द), (ग) (स), (घ) (अ)।

प्रश्न ४. (क) अधोलिखितेषु उपसर्गः नास्ति— १

(अ) प्र (ब) परा

(स) धरा (द) अप।

(ख) 'प्राचार्यः' इत्यस्मिन् पदे उपसर्गः अस्ति— १

(अ) प्राच् (ब) प्र

(स) परा (द) परि।

(ग) ..............कर्त्तव्यः प्राणैः कण्ठगतैरपि। १

(अ) परोपकारः (ब) परापकारः।

(घ) ..............किल मनुष्याणां देवतानां च दैवतम्। १

(अ) माता (ब) पिता।

उत्तर—(क) (स), (ख) (ब), (ग) (अ), (घ) (अ)।

प्रश्न ५. (क) 'गुणवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति— १

(अ) क्तवतु (ब) ल्यप्

(स) क्तिन् (द) मतुप्।

(ख) शतृ प्रत्ययस्य उदाहरणम् अस्ति— १

(अ) गतवती (ब) जेतुप्

(स) हसन् (द) गुणिन्।

(ग) 'सर्व + त्रल्' इत्यस्य पदम् भविष्यति— १

(अ) सर्वम् (ब) सर्वत्रल्

(स) सर्वत्र (द) सर्वल्।

(घ) 'टाप्' प्रत्ययस्योदाहरणम् अस्ति— १

(अ) अजा (ब) लब्ध्वा

(स) दत्वा (द) सुन्दरी।

उत्तर—(क) (द), (ख) (स), (ग) (स), (घ) (अ)।

प्रश्न ६. (क) 'विद्या माता इव रक्षति' इत्यस्मिन् वाक्ये अव्ययम् अस्ति— १

(अ) विद्या (ब) माता

(स) इव (द) रक्षति।

(ख) अधोलिखितेषु अव्ययं नास्ति— १

(अ) अत्र (ब) तत्र

(स) कुत्र (द) पुत्र।

उत्तर—(क) (स), (ख) (द)।

प्रश्न ७. युग्ममेलनं कुरुत— ४

| 'अ' | | 'ब' |
|---|---|---|
| (क) ज्वर इव | (i) | भूषणम् |
| (ख) गज इव | (ii) | तापम् |
| (ग) वाग्भूषणम् | (iii) | मदो मे व्यपगतः |
| (घ) शशि | (iv) | मदान्धः |
| | (v) | कङ्कणम् |

उत्तर—(क) → (iii), (ख) → (iv), (ग) → (i), (घ) → (ii)।

http://www.a2zSubjects.com

**प्रश्न ८. शुद्ध वाक्यानां समक्षं 'आम्' अशुद्ध वाक्यानां समक्षं 'न' इति लिखत—** ४

(क) कुबेरः रघुं धनं दत्तवान्।

(ख) रघुः हिरण्मयपात्रे कौत्साय अर्घ्यं दत्तवान्।

(ग) कौत्सः गुरुदक्षिणार्थी आसीत्।

(घ) रघुः वरतन्तुशिष्य आसीत्।

**उत्तर—(क)** आम्, **(ख)** न, **(ग)** आम्, **(घ)** न।

**प्रश्न ९. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत (कानि चत्वारि)—** ४

*(यशः, दुर्जनः, श्रेष्ठः, मृगेन्द्राः, साधकम्)*

(क) क्षमाशस्त्रं करे यस्य ................. किं करिष्यति।

(ख) ज्येष्ठः ................. कुले लोके।

(ग) महर्षिः ................. शरीरेण अमरः अस्ति।

(घ) वनेषु विक्रान्ततराः .................।

(ङ) भारतीयैकता ................. संस्कृतम्।

**उत्तर—(क)** दुर्जनः, **(ख)** श्रेष्ठः, **(ग)** यशः, **(घ)** मृगेन्द्राः, **(ङ)** साधकम्।

**प्रश्न १०. अधोलिखितेषु चत्वारि शब्दरूपाणि त्रिषु वचनेषु लिखित—** ४

(क) कवि—तृतीया विभक्तिः

(ख) जगत्—सप्तमी विभक्तिः

(ग) अस्मद्—षष्ठी विभक्तिः

(घ) तत् (स्त्रीलिङ्ग)—प्रथमा विभक्तिः

(ङ) भवत् (पुल्लिङ्ग)—द्वितीया विभक्तिः

| | | | |
|---|---|---|---|
| **उत्तर—(क)** | कविना | कविभ्याम् | कविभिः |
| **(ख)** | जगति | जगतोः | जगत्सु, |
| **(ग)** | मम | आवयोः | अस्माकम् |
| **(घ)** | सा | ते | ताः |
| **(ङ)** | भवन्तम् | भवन्तौ | भवतः |

**प्रश्न ११. अधोलिखितेषु पञ्च अशुद्धवाक्यानां शुद्धिः करणीया—** ५

(क) सीता रामस्य सह वनं गता।

(ख) त्वम् नाम किम् अस्ति।

(ग) शिक्षकः बालकं पुस्तकं ददाति।

(घ) वयं संस्कृतं पठन्ति।

(ङ) वृक्षेण पत्राणि पतन्ति।

(च) अहं दुग्धं रोचते।

**प्रश्न १२. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत।** ४

**प्रश्न १३. अधोलिखितवाक्यानां कथानुसारेण क्रमसंयोजनं कुरुत—** ५

(क) सगरस्य वंशे भगीरथ जन्म अलभत्।

(ख) तस्मिन् काले भूलोके गंगा न आसीत्।

(ग) सूर्यवंशस्य राजा सगरः आसीत्।

(घ) भगीरथः नदीं भूमितः पातालं नीतवान्।

(ङ) सगरपुत्राः स्वर्गलोकं गतवन्तः।

(च) कुपितः मुनिः तान् सगरपुत्रान् क्रोधाग्निना दग्धवान्।

**उत्तर—(ग)** → **(च)** → **(क)** → **(ख)** → **(घ)** → **(ङ)**।

**प्रश्न १४. अधोलिखितप्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत—** ४

(क) ग्रामे कः वृक्षः आसीत् ?

http://www.a2zSubjects.com

http://www.a2zSubjects.com

(ख) घटोत्कच: कया आज्ञप्त: ?

(ग) वासुदेव: कस्य प्रिय शिष्य: आसीत् ?

(घ) भारतस्य प्रथमप्रधानमंत्री क: आसीत् ?

(ङ) रथकारस्य नाम किम् आसीत् ?

उत्तर—(क) न्यग्रोधवृक्ष:, (ख) जनन्या, (ग) मार्कण्डेयस्य, (घ) पं. जवाहरलाल नेहरू:, (ङ) उज्ज्वलक:।

**प्रश्न १५. अधोलिखितप्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एक वाक्येन लिखत— ६**

(क) किं महत् पापम् अस्ति ?

(ख) महर्षि: केषाम् उद्धाराय सदैव प्रायतत् ?

(ग) क: मृतोऽपि जीवति ?

(घ) रथकार: पर्वतदेशे किमर्थं गत: ?

**प्रश्न १६. अधोलिखितगद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत— १०**

(क) 'बुन्देलकेसरी' इति विख्यातस्य छत्रसालस्य जन्म (१६४९) एकोनपञ्चाशदुत्तरषोडशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूर पर्वतीय क्षेत्रे वर्तमानलिधौराविकासखण्डे ककरकचनयग्रामे अभवत्। छत्रसालस्य मातुर्नाम सारन्धादेवी पितुर्नाम च श्री चम्पतराय: इत्यासीत्। अयं वीर: बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म।

**प्रश्न— (i) 'बुन्देलकेसरी' इति क: विख्यात: अस्ति ?**

**(ii) छत्रसालस्य जन्म कदा अभवत् ?**

**(iii) मध्यप्रदेशस्य कस्मिन् जनपदे ग्रामे च छत्रसालस्य जन्म अभवत् ?**

**(iv) छत्रसालस्य मातु: पितु: च नाम लिखत ?**

**(v) अयं वीर: बाल्यकालादेव कां मुगलशासनात् विमोक्तुं प्रयतते स्म ?**

(ख) कस्मिंश्चित् ग्रामे एक: प्राचीन: विशाल: च न्यग्रोधवृक्ष: आसीत्। स: पशुपक्षिभ्य: बहुविधेभ्य: जीवजन्तुभ्य: मनुष्येभ्य: अपि नित्यं बहूपकारक: आसीत्। पथिका: तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म। पशव: छायार्थं वृक्षमिमम् आश्रयन्ति स्म। पक्षिण: तस्य शाखासु नीडानि विरच्य वसन्ति स्म। सर्पाश्च तत्रस्थेषु वल्मीकेषु वासं कुर्वन्ति स्म। एवं स वृक्ष: सर्वप्रिय: सर्वहित: सर्वापेक्षित: च आसीत्।

**प्रश्न— (i) न्यग्रोधवृक्ष: कुत्र आसीत् ?**

**(ii) के मार्गायासं परिहरन्ति स्म ?**

**(iii) पशव: छायार्थं कुत्र आश्रयन्ति ?**

**(iv) 'विरच्य' शब्दस्य 'धातुं' प्रत्ययं च पृथक् कुरुत।**

**(v) 'ग्रामे' शब्दे का विभक्ति: अस्ति ?**

(ग) सरलसंस्कृतमेव भारतराष्ट्रभाषा भवेत्। अयमेव भाव: श्रीमातु: कथनेऽपि दृश्यते। सा संस्कृतमेव राष्ट्रभाषा भवितुमर्हति इत्युक्तवती। अन्येऽपि प्रसिद्धा: नायका: संस्कृतस्य प्रशंसां कृतवन्त: महनीयतां च स्वीकृतवन्त:। यथा—प्रथम: राष्ट्रपति: डॉ. राजेन्द्रप्रसाद: कथितवान् यत् "संस्कृतसाहित्यं न केवलं भारतस्य कृते अपितु मानवजाते: कृते अमूल्यधनम् अस्ति।"

**प्रश्न— (i) सरल संस्कृतमेव भारत राष्ट्रस्य किं भवेत् ?**

**(ii) प्रसिद्धा: नायका: कस्य प्रशंसां कृतवन्त: ?**

**(iii) भारतस्य प्रथमराष्ट्रपति: क: आसीत् ?**

**(iv) संस्कृतसाहित्यं मानवजाते: कृते किम् अस्ति ?**

**(v) 'कथितवान्' इत्यस्य पदस्य प्रकृति-प्रत्ययञ्च पृथक् कुरुत।**

**प्रश्न १७. अधोलिखितपद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत— १०**

(क) *युवान एष व: परीक्षणस्य काल आगत:*
*हिमालयस्य रक्षणे समुद्यता: स्थ सर्वत:।*

http://www.a2zSubjects.com

http://www.a2zSubjects.com http://www.a2zSubjects.com

http://www.a2zSubjects.com

*अयं सखा पुरातनोऽस्य भारतस्य विद्यते*
*स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते॥*

प्रश्न— (i) युवान एष व: कस्य काल: आगत: ?
(ii) कस्य रक्षणे समुद्यता: स्थ सर्वत: ?
(iii) अयं पुरातनोऽस्य भारतस्य क: विद्यते ?
(iv) कस्मिन् प्रवर्तितुं कदापि नैव खिद्यते ?
(v) 'कदापि' इत्यस्य पदस्य सन्धि-विच्छेदं कृत्वा सन्धि: नाम लिखत।

(ख) *प्रारभ्यते न खलु विघ्नभयेन नीचै:*
*प्रारभ्य विघ्नविहता विरमन्ति मध्या:।*
*विघ्नै: पुन: पुनरपि प्रतिहन्यमाना:*
*प्रारभ्य चोत्तम जना: न परित्यजन्ति॥*

प्रश्न— (i) कै: विघ्नभयेन कार्यं न प्रारभ्यते ?
(ii) मध्या: कदा विरमन्ति ?
(iii) के कार्यं प्रारभ्य न परित्यजन्ति ?
(iv) कै: हन्यमानापि कार्यं न परित्यजन्ति ?
(v) 'पुनरपि' इत्यस्य पदस्य सन्धि-विच्छेदं कुरुत।

(ग) *गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा।*
*पापं तापं च दैन्यं च घ्नन्ति सन्तोमहाशया:॥*

प्रश्न— (i) का पापं हन्ति ?
(ii) शशी किं करोति ?
(iii) कल्पतरु: किं हन्ति ?
(iv) पापं तापं दैन्यं च के घ्नन्ति ?
(v) 'पापम्' इति शब्दस्य विलोमपदं लिखत।

http://www.a2zSubjects.com

प्रश्न १८. अधोलिखितम् अपठितं गद्यांशम् सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत— ५

भारतस्य उत्तरायां दिशि महोन्नत: पर्वतराज: हिमालय: वर्तते। य: उत्तरदिशि प्रहरी इव रक्षति। हिमालय: भारतदेशस्य समृद्ध भूभाग: अस्ति। अस्मात् पर्वतात् नद्य: निस्सरन्ति देशस्य विशालं भूभागं सिञ्चन्ति च।

प्रश्न—(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
(ख) भारतस्य उत्तरायां दिशि क: वर्तते ?
(ग) प्रहरी इव भारतं क: रक्षति ?
(घ) भारतदेशस्य समृद्ध: भूभाग: क: अस्ति ?
(ङ) 'हिमालय:' इति पदस्य सन्धि-विच्छेदं कृत्वा सन्धि नाम लिखत।

प्रश्न १९. स्वप्राचार्यस्यकृते अवकाशार्थम् एकं आवेदन-पत्रं संस्कृते लिखत। ४

*अथवा*

छात्रवृत्यर्थं संस्कृते एकं आवेदन-पत्रं स्वप्राचार्यं प्रति लिखत।

प्रश्न २०. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत— १०
(क) संस्कृतभाषाया: महत्त्वम्,
(ख) मम दिनचर्या,
(ग) अस्माकं देश:,
(घ) महाकवि: कालिदास:।

http://www.a2zSubjects.com http://www.a2zSubjects.com